# काव्यशास्त्रस्य षड्विधप्रस्थानानि

**डॉ. अमरेन्द्रकुमारमिश्रः**
**सहाचार्य:, साहित्यविभागः**

कवेः कर्म भावो वा काव्यम् । काव्यशब्दः कविशब्दात् प्यञि प्रत्यये कृते सति सिद्धयति कविशब्दोऽपि ''कुङ्शब्दे" "कवृवर्णने" वेति धातो, "कौति कवयति" वेति व्युत्पत्या निष्पद्यते । अनया व्युत्पत्या सिद्धयति यत् कवेः गानं वर्णनं वा काव्यमिति ।
काव्यप्रस्थानविवेचनात् प्राक् काव्यलक्षणपरिज्ञानमावश्यकमित्यनुभवाम्यहम् । काव्यलक्षणानि न केवलं विजातीयेभ्यो काव्यं व्यावर्तयन्ति, अपितु काव्येष्वपि एकं विशिष्टमितरस्माद् विशिष्टकाव्यात् काव्ये केचन शब्दप्राधान्यवादिनः, अपरे अर्थप्रधान्यवादिनः अन्ये च शब्दार्थयोः प्राधान्यवादिनः वर्त्तन्ते ।

वस्तुतः शब्दस्य, शब्दार्थयोः एव विवेचनवाहुल्यं काव्यशास्त्रेषूपलभ्यते । अर्थप्राधान्यवादिना माचार्याणां बहुशो चर्चा काव्यशास्त्रेषु न दृश्यते ।

"वाच्यमेव रचनावैचित्र्य चमत्कारकारि काव्यमिति कथयित्वा काव्ये अर्थप्राधान्यं वक्रोक्ति- जीवितकारेण कुन्तकाचार्येण स्थापितम, परञ्च नैतन्मतं परवर्तीभिराचार्यैः आदृतम् । शब्दार्थी काव्यमित्यस्य स्थापक आचार्य भामहः । मतस्यास्य पोषकाः रुद्रट वामनमम्मटादयो वर्तन्ते । शब्दः काव्यमित्यस्य पक्षस्य प्रवलसमर्थकेष्वन्यतमः पण्डितराजजगन्नाथो वर्तते । पण्डितराजेन "रमणीयार्थप्रतिपादकः शब्दः काव्यमित्युक्तम् ।

काव्यलक्षणस्य सजातीव्यावर्तनविधिरूपता" समानासमानजातीयव्यवच्छेदो लक्षणार्थः । इति सांख्यतत्वकौमुद्याः सिद्धान्तानुरोधादेव स्वीक्रियते । अयमेव सजातीयव्यावर्तनविधिः काव्यप्रस्थानरूपतां प्रतिपद्यते । प्रस्थानशब्दस्य व्युत्पत्तिः ध्वन्यालोकलोचनकारः अभिनवगुप्तपादः प्रतिष्ठन्ते परम्परया व्यवहारन्ति येन मार्गेण तत्प्रस्थानम्" इति। कविस्वभावभेदेन प्रस्थानभेद इति कुन्तकाचार्य: ।

आद्यतन्तकाव्यशास्त्रपरिशीलनेन स्पष्टं यत् अलङ्कारशास्त्रे रसालंकार-रीति ध्वनि वक्रोक्त्यौचित्याख्यानि षडेव प्रस्थानानि प्रसिद्धानि सन्ति । अलंकारसर्वस्वटीकाकारेण समुद्रबन्धेन पञ्च एव प्रधानानि रसालंकारादीनि प्रस्थानानि औचित्यस्य परवर्तीत्वाद् तत्रानुल्लेखमिति मन्मतिः । रसप्रस्थानम् - रस्यत इति रसः । आस्वाद्यापरस्यास्य रसप्रस्थानस्य प्रधानो प्रवर्तक आचार्य भरतः वर्तते । आचार्यस्य "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति" रिति सूत्रमेव रससिद्धान्तस्य मूलम् वर्तते ।

सूत्रस्यास्य व्याख्याकारेषु भट्टलोल्लट - शङ्कुक-भट्टनायक-अभिनवगुप्तपादाः प्रमुखाः सन्ति । पण्डितराजप्रतिपादिते रसगंगाधरे त्वस्य एकादशव्याख्या उपलभ्यन्ते ।

रसव्याख्यानपरेषु प्रसिद्धेषु चतुर्षु एव मतेषु स्थायिनां विभावैर्ललनोद्यानादिभिरालम्बौनोद्दीपनैः, अनुभावैः भुजाक्षेपादिभिः कार्ये, व्यभिचारिभावैः निदर्वेदादिभिः सहकारिभिः संयोगात् उत्पाद्योत्पादकभावरूपात् गम्यगमकभावरूपात् भोज्यभोजकभावरूपात् अभिव्यंग्य- अभिव्यंजकभावरूपात् च सम्बन्धात् रसस्य निष्पत्तिः उत्पत्तिः, अनुमितिः, भुक्तिः, अभिव्यक्तिश्च रससूत्रार्थो वर्तते । श्रृंगारादयो अष्टावेव रसाः नाट्ये एवं च शान्तरससहिताः नवरसाः श्रव्यकाव्ये भवन्ति । रसस्य काव्यात्माविषये वाग्वैदग्धप्रधानेऽपि रस एवात्र जीवितम् इतिकथनमतीव समीचीनं वर्तते । काव्यमीमांसाकारेण राजशेखरेणापि "रस आत्मा" इत्युक्त्वा रसस्यात्मत्वं स्थापितम् । प्रस्थानस्यास्य महन्महत्वं वर्तते ।

अलंकार प्रस्थानम् अलंक्रियतेऽनेनेति व्युत्पत्या अलंकारः शब्दः शरीरसुषमाधायकत्वेन. काव्यशास्त्रे व्यवस्थितो वर्तते । अलंकृतिरलङ्करणं वाऽलंकार इति भावव्युत्पत्यात्मकोऽलंकारशब्दः काव्यशास्त्रस्य सौन्दर्यस्यश्च वाचको वर्तते, अलंकारप्रस्थानपोषकेष्वाचार्येषु भामह - उद्भट - दण्डिरुद्रदादयो प्रमुखाः सन्ति । एते सर्वे एव रसतत्वभिज्ञाः, तथापि अलंकारप्रस्थापनपराः दृश्यन्ते । एतेषु आचार्यो दण्डी सर्वप्रथमं सर्वाण्येव काव्यतत्वानि अलङ्कारेत्वेनाङ्गीकृत्य विलक्षणमलङ्कारलक्षणमुपस्थापितवान् । तच्चेत्थं "काव्यशोभाकरान् धर्मानलङ्कारान प्रचक्षते" इति वर्तते । आचार्य भामहेन "सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते । यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना । इति प्रो सर्वेषामलङ्काराणां वक्रोक्तिमूलकत्वं दर्शितम्। मम्मटाचार्येणापि गुणीभूतव्यंग्यस्य उदाहरणत्वेन " ग्रामतरूणं तरुण्या" इति उपस्थाप्य अलङ्कारप्राधान्यमंशतः स्वीकृतम्, वर्णिताश्च काव्यप्रकाशे अनेकेऽलंकाराः । अन्यप्रस्थानपोषका अपि आचार्याः श्रद्धया अलङ्कारान् वर्णयामासुः । भरतेन वर्णिता उपमादयोः चत्वारोऽलंकारराः क्रमशः कुवलयानन्दं यावत् चतुर्विंशत्यधिकशतसंख्यतामवापुरिति ।

रीति प्रस्थानम् - " रीङ् " गतौ धातुना रीतिशब्दस्य निष्पतिर्भवति । रीयन्ते गच्छन्त्यनयेति रीतिः । रीतिरेव मार्ग पद्धतिः, वृत्तिरित्यादिरूपैः परिकीर्तिताराचायैरिति । दण्ड्यादिपूर्वाचार्यैरपि रीतिचर्चा कृता, परन्त्वस्या आत्मारूपेण स्थापना वामनेन विहिता । वामनाचार्येण रीतिरात्मा काव्यस्य, विशिष्टा पदरचना च रीतिः ।। " इति प्रतिपादयित्वा न हि केवलमात्मत्वमस्याः स्थापितमपितु . गुणालङ्कारेभ्यो पार्थक्यमपि प्रदर्शितम् । अतएव वामन एवास्य मतस्य प्रस्थानस्य वा मूर्धन्य उद्भावकः वर्तते । रीतेः स्वरूपंविषये उक्तमार्येण "समग्रगुणाः वैदर्भी, औजः कान्तिमती गौडीया, माधुर्य- सौकुमार्योपन्ना च पाञ्चाली ।" इति । अनन्तरञ्चात्र लाटीया आवन्तिकादीनां रीतीनां समावेशं विधाय एतासां संख्यात्रयोदशतां प्रापयन्त आचार्याः।

वक्रोक्ति-प्रस्थानम् - वक्रोक्तिपदं व्याकुर्वन् स्वयं प्रतिपादयति प्रस्थानप्रवर्तकः कुन्तकाचार्यः "वक्रोकितरेव वैदग्ध्य-भङ्गी भणितिरूच्यते" इति । रसालंकाररीत्या सर्वाण्येव तत्त्वानि वक्रोक्तिकुक्षी निक्षिप्य

कुन्तकाचार्यः वक्रोक्ति काव्यजीवितम्" इति प्रतिपादितवान् । आचार्यकुन्तकस्य मतमिदमतीच मौलिकं क्रान्तिकारि च प्रतिभाति परञ्च समर्थकाभावात् न अग्रे अवर्धत ।

ध्वनि-प्रस्थानम् ध्वनिप्रस्थानप्रतिष्ठापनाचार्यौऽऽनन्दवर्धनः वर्तते । ध्यन्यालोके व्यंग्यव्यंजनाप्रबन्धादिषु पञ्चसु ध्वनिशब्दस्य व्यापृतिः दर्शित आचार्येण काव्यस्यात्मा ध्वनिरिति व्याहत्य ध्वनेः काव्यात्मत्वं व्यवस्थापितमानन्दवर्धनेन ।

ध्वनिरित्थं लक्षयति आनन्दवर्धनः यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृत्स्वार्थौ ।

व्यक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ।

ध्वनिकारः कथयति यत् ध्वनिः व्यंग्यप्राधान्य एव भवति । एतदर्थं व्यंज्जनायाः स्थापनार्थ- प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकमीनाम् ।

यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु" इति कथयति । आनन्दवर्धनाचार्यः वाच्यार्थापेक्षया प्रतीयमानस्य व्यंग्यस्य वा प्राधान्ये ध्वनिव्यवहारं करोति । वाच्यादनतिशायिनि व्यंग्ये गुणीभूतव्यंग्यत्वम् एवञ्च वाच्यादस्फुटे व्यंग्ये चित्रत्वमिति व्यवहरन्ति । काव्यात्मारूपेण व्यवस्थितस्यास्य ध्वनेः वस्त्वलंकाररसभेदैः त्रयोः भेदाः भवन्ति । त्रिष्वपि रसध्वनेरेव प्राधान्यं स्वयमाचार्य अपि स्वीकरोति । साकल्येन ध्वनेरस्य शुद्धभेदाः "एकपञ्चाशत्" भवन्ति । संकरसंसृष्टयादिभिः शरेषुयुगखेन्दवः अर्थात् १०४५५ ध्वनिभेदाः भवन्ति ।

औचित्य प्रस्थानम् औचित्यप्रस्थानप्रवर्तक आचार्यः क्षेमेन्द्रः वर्तते । क्षेमेन्द्र औचित्यविचारचर्चायामौचित्यं विवृणुवन् स्वयमुल्लिखति -

"उचितं प्राहुराचार्याः सदृशं किल यस्य यत् ।

उचितस्य च यो भावस्तदौचित्यं प्रचक्षते ।।"

आचार्य क्षेमेन्द्रानुसारमेतदेव -

औचित्यं काव्यजीवातुभूतमिति दर्शयति "औचित्यस्य चमत्कारकारिणेचारुचर्वणे । रसजीवितभूतस्य विचारं कुरुतेऽधुना ॥

प्रायः सर्वैरेव पूर्वाचार्यैः साक्षात् परम्परया वा औचित्यस्य चर्चा विहिता परञ्च तेभ्यः क्षेमेन्द्रस्य औचित्यदृष्टिः भिन्नैव वर्तते । दृष्टिभेदत्वादत्र घटते प्रस्थानत्वम् औचित्यस्येति । इत्थं मया स्पष्टतया निवेदयितुं शक्यते यत् भरतादारभ्य पण्डितराजगन्नाथपर्यन्तं सहस्रद्वयात्मकं समयं काव्यशास्त्रं प्राधान्यप्राधान्यविवादे एव व्यतीतं करोति । एष प्राधान्याप्राधान्यत्मको विचाररूपविवाद एव षण्णां रसादीनां प्रस्थानां प्रधानं कारणमिति ।

**सन्दर्भग्रन्थसूची-**

१) वक्रोकितजीवितम् ७ कारिका
२) काव्यालंकारस्य काव्यलक्षणम-भामहः
३) रसगंगाधरस्य काव्यलक्षणम् - जगन्नाथः
४) सांख्यतत्वकौमुदी ५ कारिका
५) ध्वन्यालोकलोचनम् - पृ. २२
६) वक्रोतिजीवितम् पृ.१०१ - कुन्तक
७) अलंकार सर्वस्व - पृ.०४ रूय्यक
८) नाट्यशास्त्रम् - भरतः
९) अग्निपुराण पृ.३३६-३३
१०) काव्यमीमांसा पृ. ६ राजशेखर:
११) काव्यादर्श पअ. २११ - दण्डी
(१२) काव्यालंकारः भामहः-२, ८५
१३) काव्याप्रकाशः १, ३ मम्मयः
१४) काव्यलंकारसूत्रवृति: १२-६-७ वामनः
(१५) काव्यलंकारसूत्रवृतिः १ २ ६-७ वामनः
१६) वक्रोक्तिजीवितम् - १-२-६-७ वामनः
१७) वक्रोक्तिजीवितम
१८) ध्वन्यालोक ११ आनन्दवर्धन
१९) ध्वन्यालोक १-१३ आनन्दवर्धन
२०) ध्वन्यालोक पृ. २१
२१) काव्यप्रकाशः चतुर्थोल्लासः
२३) औचित्यविचारचर्चा ३ कारिका
२२) औचित्यविचारचर्चा ७ कारिका